# श्रीमद् भागवत रसिक कुटुंब

## ॥ श्री गीत गोविंद॥



### ॥ प्रथमः सर्गः॥(सामोददामोदरः)

(शार्दूलविक्रीडितेन)

**मेघैर्मेदुरमम्बरं(वँ) वनभुवः(श्) श्यामास्तमालद्रुमैर्-**
**नक्तं(म्) भीरुरयं(न्) त्वमेव तदिमं(म्) राधे गृहं(म्) प्रापय ।**
**इत्थं(न्) नन्दनिदेशितश्चलितयोः(फ्) प्रत्यध्वकुञ्जद्रुमं(म्)**
**राधामाधवयोर्जयन्ति यमुनाकूले रहः(ख्)केलयः ॥ 1॥**

(वसंततिलकावृत्तम्)

**वाग्देवताचरितचित्रितचित्तसद्मा**
**पद्मावतीचरणचारणचक्रवर्ती ।**
**श्रीवासुदेवरतिकेलिकथासमेत-**
**मेतं(ङ्) करोति जयदेवकविः(फ्) प्रबन्धम् ॥ 2॥**

द्रुतविलंबतेन

**यदि हरिस्मरणे सरसं(म्) मनो**
**यदि विलासकलासु कुतूहलम् ।**
**मधुरकोमलकान्तपदावलीं(म्)**
**शृणु तदा जयदेवसरस्वतीम् ॥ 3॥**

(शार्दूलविक्रीडितेन)

वाचः(फ्) पल्लवयत्युमापतिधरः(स्) सन्दर्भशुद्धिं(ङ्) गिरां(ञ्)
जानीते जयदेव एव शरणः(श्) श्लाघ्यो दुरूहद्रुते ।
शृङ्गारोत्तरसत्प्रमेयरचनैराचार्यगोवर्धन-
स्पर्धी कोऽपि न विश्रुतः(श्) श्रुतिधरो धोयी कविक्ष्मापतिः ॥ 4॥

॥ गीतम् १॥

(अथ प्रथमप्रबन्धो मालवरागेण रूपक ताले गीयते)

प्रलयपयोधिजले धृतवानसि वेदम् ।
विहितवहित्रचरित्रमखेदम् ॥
केशव धृतमीनशरीर जय जगदीश हरे ॥ 1॥

क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे ।
धरणिधरणकिणचक्रगरिष्ठे ॥
केशव धृतकच्छपरूप जय जगदीश हरे ॥ 2॥

वसति दशनशिखरे धरणी तव लग्ना ।
शशिनि कलङ्ककलेव निमग्ना ॥
केशव धृतसूकररूप जय जगदीश हरे ॥ 3॥

तव करकमलवरे नखमद्भुतशृङ्गम् ।
दलितहिरण्यकशिपुतनुभृङ्गम् ॥
केशव धृतनरहरिरूप जय जगदीश हरे ॥ 4॥

छलयसि विक्रमणे बलिमद्भुतवामन ।
पदनखनीरजनितजनपावन ॥
केशव धृतवामनरूप जय जगदीश हरे ॥ 5॥

क्षत्रियरुधिरमये जगदपगतपापम् ।
स्नपयसि पयसि शमितभवतापम् ॥
केशव धृतभृगुपतिरूप जय जगदीश हरे ॥ 6॥

वितरसि दिक्षु रणे दिक्पतिकमनीयम् ।
दशमुखमौलिबलिं(म्) रमणीयम् ॥
केशव धृतरामशरीर जय जगदीश हरे ॥ 7॥

वहसि वपुषि विशदे वसनं(ञ्) जलदाभम् ।
हलहतिभीतिमिलितयमुनाभम् ॥
केशव धृतहलधररूप जय जगदीश हरे ॥ 8॥

निन्दसि यज्ञविधेरहह श्रुतिजातम् ।
सदयहृदयदर्शितपशुघातम् ॥
केशव धृतबुद्धशरीर जय जगदीश हरे ॥ 9॥

म्लेच्छनिवहनिधने कलयसि करवालम् ।
धूमकेतुमिव किमपि करालम् ॥

केशव धृतकल्किशरीर जय जगदीश हरे ॥ 10॥

श्रीजयदेवकवेरिदमुदितमुदारम् ।
शृणु सुखदं(म्) शुभदं(म्) भवसारम् ॥
केशव धृतदशविधरूप जय जगदीश हरे ॥ 11॥

इति श्रीगीतगोविन्दे प्रथमः प्रबन्धः॥

(शार्दूलविक्रीडितेन)
वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते
दैत्यन्दारयते बलिं(ञ्) छलयते क्षत्रक्षयं(ङ्) कुर्वते ।
पौलस्त्यं(ञ्) जयते हलं(ङ्) कलयते कारुण्यमातन्वते
म्लेच्छान्मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं(न्) नमः ॥ 1॥

॥ गीतम् 2॥

(अथ द्वितीयप्रबन्धो गुर्जरीरागेण प्रतिमठताले गीयते)
श्रितकमलाकुचमण्डल धृतकुण्डल ए ।
कलितललितवनमाल जय जयदेव हरे ॥ 1॥

दिनमणिमण्डलमण्डन भवखण्डन ए ।
मुनिजनमानसहं(म्)स जय जयदेव हरे ॥ 2॥

कालियविषधरभञ्जन जनरञ्जन ए ।

यदुकुलनलिनदिनेश जय जयदेव हरे ॥ 3॥

मधुमुरनरकविनाशन गरुडासन ए ।
सुरकुलकेलिनिदान जय जयदेव हरे ॥ 4॥

अमलकमलदललोचन भवमोचन ए ।
त्रिभुवनभवननिधान जय जयदेव हरे ॥ 5॥

जनकसुताकृतभूषण जितदूषण ए ।
समरशमितदशकण्ठ जय जयदेव हरे ॥ 6॥

अभिनवजलधरसुन्दर धृतमन्दर ए ।
श्रीमुखचन्द्रचकोर जय जयदेव हरे ॥ 7॥

तव चरणं(म्) प्रणता वयमिति भावय ए ।
कुरु कुशलं(म्) प्रणतेषु जय जयदेव हरे ॥ 8॥

श्रीजयदेवकवेरिदं(ङ्) कुरुते मुदम् ए ।
मङ्गलमुज्ज्वलगीतं(ञ्) जय जयदेव हरे ॥ 9॥

इति श्रीगीतगोविन्दे द्वितीयः प्रबन्धः

(वसंततिलकावृत्तम्)

पद्मापयोधरतटीपरिरम्भलग्न-

काश्मीरमुद्रितमुरो मधुसूदनस्य ।

व्यक्तानुरागमिव खेलदनङ्गखेद-

स्वेदाम्बुपूरमनुपूरयतु प्रियं(वँ्) वः ॥ 1॥

(शिखरिणी)

वसन्ते वासन्तीकुसुमसुकुमारैरवयवैर्-

भ्रमन्तीं(ङ्) कान्तारे बहुविहितकृष्णानुसरणाम् ।

अमन्दं(ङ्) कन्दर्पज्वरजनितचिन्ताकुलतया

वलद्बाधां(म्) राधां(म्) सरसमिदमुचे सहचरी ॥ 2॥

॥ गीतम् 3 ॥

(अथ तृतीयप्रबन्धो वसन्तरागेण रूपकताले गीयते)

ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे ।

मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे ॥

विहरति हरिरिह सरसवसन्ते

नृत्यति युवतिजनेन समं(म्) सखि विरहिजनस्य दुरन्ते ॥ 1॥ विहरति

उन्मदमदनमनोरथपथिकवधूजनजनितविलापे ।

अलिकुलसं(ङ्)कुलकुसुमसमूहनिराकुलबकुलकलापे ॥ 2॥ विहरति

मृगमदसौरभरभसबशं(वँ्)वदनवदलमालतमाले ।

युवजनहृदयविदारणमनसिजनखरुचिकिं(म्)शुकजाले ॥ 3॥ विहरति

मदनमहीपतिकनकदण्डरुचिकेसरकुसुमविकासे ।
मिलितशिलीमुखपाटलपटलकृतस्मरतूणविलासे ॥ 4॥ विहरति

विगलितलज्जितजगदवलोकनतरुणकरुणकृतहासे ।
विरहिनिकृन्तनकुन्तमुखाकृतिकेतकदन्तुरिताशे ॥ 5॥ विहरति

माधविकापरिमलललिते नवमालिकयातिसुगन्धौ ।
मुनिमनसामपि मोहनकारिणि तरुणाकारणबन्धौ ॥ 6॥ विहरति

स्फुरदतिमुक्तलतापरिरम्भणमुकुलितपुलकितचूते ।
वृन्दावनविपिने परिसरपरिगतयमुनाजलपूते ॥ 7॥ विहरति

श्रीजयदेवभणितमिदमुदयति हरिचरणस्मृतिसारम् ।
सरसवसन्तसमयवनवर्णनमनुगतमदनविकारम् ॥ 8॥ विहरति

इति श्रीगीतगोविन्दे तृतीयः प्रबन्धः ॥

(मालिनी)

दरविदलितमल्लीवल्लिचञ्चत्पराग-
प्रकटितपटवासैर्वासयन् काननानि ।
इह हि दहति चेतः(ख्) केतकीगन्धबन्धुः(फ्)
प्रसरदसमबाणप्राणवद्गन्धवाहः ॥ 1॥

(शार्दूलविक्रीडितेन)

उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर-
क्रीडत्कोकिलकाकलीकलरवैरुद्गीर्णकर्णज्वराः ।
नीयन्ते पथिकैः(ख्) कथं(ङ्) कथमपि ध्यानावधानक्षण-
प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः ॥ 2॥

(जगती)

अनेकनारीपरिरम्भसम्भ्रम-
स्फुरन्मनोहारिविलासलालसम् ।
मुरारिमारादुपदर्शयन्त्यसौ
सखीसमक्षं(म्) पुनराह राधिकाम् ॥ 3॥

॥ गीतम् 4॥

(अथ चतुर्थप्रबन्धो रामकरीरागेण रूपकताले गीयते)

चन्दनचर्चितनीलकलेवरपीतवसनवनमाली ।
केलिचलन्मणिकुण्डलमण्डितगण्डयुगस्मितशाली ॥
हरिरिहमुग्धवधूनिकरे विलासिनि विलसति केलिपरे ॥ 1॥

पीनपयोधरभारभरेण हरिं(म्) परिरभ्य सरागम् ।
गोपवधूरनुगायति काचिदुदञ्चितपञ्चमरागम् ॥ 2॥  हरिरिह

कापि विलासविलोलविलोचनखेलनजनितमनोजम् ।
ध्यायति मुग्धवधूरधिकं(म्) मधुसूदनवदनसरोजम् ॥ 3॥ हरिरिह

कापि कपोलतले मिलिता लपितुं(ङ्) किमपि श्रुतिमूले ।
चारु चुचुम्ब नितम्बवती दयितं(म्) पुलकैरनुकूले ॥ 4॥ हरिरिह

केलिकलाकुतुकेन च काचिदमुं(यँ) यमुनाजलकूले ।
मञ्जुलवञ्जुलकुञ्जगतं(वँ) विचकर्ष करेण दुकूले ॥ 5॥ हरिरिह

करतलतालतरलवलयावलिकलितकलस्वनवं(म्)शे ।
रासरसे सह नृत्यपरा हरिणा युवतिः(फ्) प्रशशं(म्)से ॥ 6॥ हरिरिह

श्लिष्यति कामपि चुम्बति कामपि कामपि रमयति रामाम् ।
पश्यति सस्मितचारुपरामपरामनुगच्छति वामाम् ॥ 7॥ हरिरिह

श्रीजयदेवकवेरिदमद्भुतकेशवकेलिरहस्यम् ।
वृन्दावनविपिने ललितं(वँ) वितनोतु शुभानि यशस्यम् ॥ 8॥ हरिरिह

इति श्रीगीतगोविन्दे चतुर्थः प्रबन्धः

(शार्दूलविक्रीडितेन)

विश्वेषामनुरञ्जनेन जनयन्नानन्दमिन्दीवर-
श्रेणीश्यामलकोमलैरुपनयन्नङ्गैरनङ्गोत्सवम् ।
स्वच्छन्दं(वँ) व्रजसुन्दरीभिरभितः(फ्) प्रत्यङ्गमालिङ्गितः(श्)
शृङ्गारः(स्) सखि मूर्तिमानिव मधौ मुग्धो हरिः(ख्) क्रीडति ॥ 1॥

(शार्दूलविक्रीडितेन)

**नित्योत्सङ्गवसद्भुजङ्गकवलक्लेशादिवेशाचलं**
**प्रालेयप्लवनेच्छयानुसरति श्रीखण्डशैलानिलः ।**
**किं(ञ्) च स्निग्धरसालमौलिमुकुलान्यालोक्य हर्षोदया-**
**दुन्मीलन्ति कुहूः(ख्) कुहूरिति मुहुस्ताराः(फ्) पिकानां(ङ्) गिरः ॥ 2॥**

(शार्दूलविक्रीडितेन)

**रासोल्लासभरेण विभ्रमभृतामाभीरवामभ्रुवा-**
**मभ्यर्णं(म्) परिरभ्य निर्भरमुरः(फ्) प्रेमान्धया राधया ।**
**साधुत्वद्वदनं(म्) सुधामयमिति व्याहृत्य गीतस्तुतिर्-**
**व्याजादुद्भटचुम्बितः(स्) स्मितमनोहरी हरिः(फ्) पातु वः ॥ 3॥**

**॥ इति श्रीगीतगोविन्दे सामोददामोदरो नाम प्रथमः सर्गः ॥**

